
## तृतीयः पाठः

# एषः कः ? एषा का ? एतत् किम् ?

### पुंलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
|  |  |  |
| बालकः | बालकौ | बालकाः |
|  |  |  |
| वृक्षः | वृक्षौ | वृक्षाः |
|  |  |  |
| गजः | गजौ | गजाः |

### स्त्रीलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
|  |  |  |
| बालिका | बालिके | बालिकाः |

© NCERT not to be republished

Reprint 2025-26



वैद्या




वैद्ये




वैद्याः



अजा




अजे



अजाः

## नपुंसकलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |




पत्रम्




पत्रे




पत्राणि




चक्रम्



चक्रे



चक्राणि



पुस्तकम्



पुस्तके



पुस्तकानि

© NCERT not to be republished



Reprint 2025-26

# क्रियापदानि

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
|  |  |  |
| पठति | पठतः | पठन्ति |
|  |  |  |
| पिबति | पिबतः | पिबन्ति |
|  |  |  |
| खादति | खादतः | खादन्ति |
|  |  |  |
| गच्छति | गच्छतः | गच्छन्ति |
|  |  |  |
| क्रीडति | क्रीडतः | क्रीडन्ति |

© NCERT not to be republished



Reprint 2025-26


# सर्वनाम-प्रयोगः



**सः** शुकः



**तौ** शुकौ



**ते** शुकाः



**एषः** बालकः



**एतौ** बालकौ



**एते** बालकाः



**सा** शिक्षिका



**ते** शिक्षिके




**ताः** शिक्षिकाः




**एषा** बालिका



**एते** बालिके




**एताः** बालिकाः



**तत्** फलम्



**ते** फले



**तानि** फलानि



**एतत्** फलम्।



**एते** फले



**एतानि** फलानि

© NCERT not to be republished



Reprint 2025-26

## पुंलिङ्गम् (एकवचनम्)

सः कः ?
सः शिक्षकः।
सः किं करोति ?
सः पाठयति।
किं सः भ्रमति ?
न, सः न भ्रमति।
सः तु पाठयति।



## पुंलिङ्गम् (द्विवचनम्)

तौ कौ ?
तौ मयूरौ।
तौ किं कुरुतः ?
तौ नृत्यतः।
किं तौ खादतः ?
न, तौ न खादतः।
तौ तु नृत्यतः।



## पुंलिङ्गम् (बहुवचनम्)

ते के ?
ते बालकाः।
ते किं कुर्वन्ति ?
ते क्रीडन्ति।
किं ते गायन्ति ?
न, ते न गायन्ति।
ते तु क्रीडन्ति।





Reprint 2025-26

© NCERT not to be republished

## पुंलिङ्गम् (एकवचनम्)

एषः कः ?

एषः शिक्षकः।

शिक्षकः किं करोति ?

शिक्षकः लिखति।

किम् एषः पठति ?

न, एषः न पठति। एषः लिखति।



## पुंलिङ्गम् (द्विवचनम्)

एतौ कौ ?

एतौ बालकौ।

बालकौ किं कुरुतः ?

बालकौ पठतः।

किम् एतौ लिखतः ?

न, एतौ न लिखतः। एतौ तु पठतः।



## पुंलिङ्गम् (बहुवचनम्)



एते के ?

एते बालकाः।

बालकाः किं कुर्वन्ति ?

बालकाः पिबन्ति।

किम् एते पिबन्ति ?

आम्, एते फलरसं पिबन्ति।

© NCERT not to be republished



Reprint 2025-26

## स्त्रीलिङ्गम् (एकवचनम्)

सा का?

सा वृद्धा।

सा किं करोति?

सा विहरति।

किं सा क्रीडति?

न, सा न क्रीडति।

सा तु विहरति।



## स्त्रीलिङ्गम् (द्विवचनम्)

ते के?

ते अजे।


ते किं कुरुतः?

ते चरतः।

किं ते पिबतः?

न, ते न पिबतः।

ते तु चरतः।



## स्त्रीलिङ्गम् (बहुवचनम्)

ताः काः?

ताः महिलाः।


ताः किं कुर्वन्ति?

ताः धावन्ति।

किं ताः गायन्ति?

न, ताः न गायन्ति।

ताः तु धावन्ति।



© NCERT not to be republished



Reprint 2025-26

## स्त्रीलिङ्गम् (एकवचनम्)

एषा का?

एषा लता।

एषा किं करोति?

एषा खादति।

किम् एषा पठति?

न, एषा न पठति। एषा तु खादति।



## स्त्रीलिङ्गम् (द्विवचनम्)

एते के?

एते बालिके।

एते किं कुरुतः?


एते भ्रमतः।

किम् एते धावतः?

न, एते न धावतः। एते तु भ्रमतः।



## स्त्रीलिङ्गम् (बहुवचनम्)



एताः काः?

एताः अजाः।

एताः किं कुर्वन्ति?

एताः चरन्ति।


किम् एताः धावन्ति?

न, एताः न धावन्ति। एताः तु चरन्ति।

© NCERT not to be republished

## नपुंसकलिङ्गम् (एकवचनम्)

तत् किम् ?
तत् चन्द्रयानम्।
किं तत् विमानम् ?
न, तत् विमानं न।
तत् तु चन्द्रयानम् अस्ति।



## नपुंसकलिङ्गम् (द्विवचनम्)

ते के ?
ते पुस्तके।
किं ते पत्रे ?
न, ते पत्रे न।
ते तु पुस्तके स्तः।




## नपुंसकलिङ्गम् (बहुवचनम्)

तानि कानि ?
तानि रेलयानानि।
किं तानि बसयानानि ?
न, तानि बसयानानि न।
तानि तु रेलयानानि सन्ति।




© NCERT not to be republished



Reprint 2025-26

## नपुंसकलिङ्गम् (एकवचनम्)


एतत् किम्?

एतत् दूरदर्शनम्।

किम् एतत् सङ्गणकम्?

न, एतत् सङ्गणकं न।

एतत् तु दूरदर्शनम् अस्ति।



## नपुंसकलिङ्गम् (द्विवचनम्)


एते के?

एते फले।

किम् एते कन्दुके?

न, एते कन्दुके न।

एते तु फले स्तः।



## नपुंसकलिङ्गम् (बहुवचनम्)

एतानि कानि?

एतानि पुस्तकानि?

किम् एतानि सोपानानि सन्ति?

न, एतानि सोपानानि न।

एतानि तु पुस्तकानि सन्ति।



**उच्चैः पठन्तु स्मरन्तु अवगच्छन्तु च**

| पुंलिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| सः | तौ | ते | सा | ते | ताः | तत् | ते | तानि |
| एषः | एतौ | एते | एषा | एते | एताः | एतत् | एते | एतानि |
| कः | कौ | के | का | के | काः | किम् | के | कानि |

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| लता | वल्ली | बेल | Creeper | |
| फलम् | फलम् | फल | Fruit | |
| पुस्तकम् | ग्रन्थः | पुस्तक | Book | |
| अजा | छागी | बकरी | Goat (Female) | |
| सोपानम् | आरोहणम् | सीढ़ी | Stairs | |
| सङ्गणकम् | सङ्गणकयन्त्रम् | सङ्गणक | Computer | |
| दूरदर्शनम् | दूरदर्शनम् | दूरदर्शन | Television | |

## वयम् अभ्यासं कुर्मः

१. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु —

| | | | |
|---|---|---|---|
| यथा – | बालकः | बालकौ | बालकाः |
| (क) | चषकः | .................... | .................... |
| (ख) | .................... | .................... | देवाः |
| (ग) | सैनिकः | .................... | .................... |
| (घ) | .................... | रजकौ | .................... |
| (ङ) | तन्त्रज्ञः | .................... | .................... |



२. उदाहरणानुसारं पट्टिकातः पदानि चित्वा रिक्तस्थानेषु संयोजयन्तु —

| | | | |
|---|---|---|---|
| यथा – | सः शुकः | .................... | .................... |
| सः | .................... | .................... | .................... |
| सा | .................... | .................... | .................... |
| तत् | .................... | .................... | .................... |

शुकः स्यूतः अजा फलम्
पुष्पम् महिषी वृक्षः कुक्कुरः
पार्वती पुस्तकम्

© NCERT not to be republished



Reprint 2025-26

३. **चित्राणि दृष्ट्वा संस्कृतपदानि लिखन्तु—**




(क) ..............................



(ख) ..............................



(ग) ..............................



(घ) ..............................



(ङ) ..............................



(च) ..............................

४. **उदाहरणानुसारं पट्टिकातः पदानि चित्वा रिक्तस्थानेषु लिखन्तु—**

बालकाः वृक्षाः शिक्षिकाः पुष्पम् फलम् अजाः
मापिकाः गायिका रजकः फलानि सः लेखनी

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| यथा – | पुष्पम् | बालकाः |
| (क) | .......................... | .......................... |
| (ख) | .......................... | .......................... |
| (ग) | .......................... | .......................... |
| (घ) | .......................... | .......................... |
| (ङ) | .......................... | .......................... |



© NCERT not to be republished



Reprint 2025-26

५. **पट्टिकायां कानिचन पदानि सन्ति, तानि पदानि उचिते घटे पूरयन्तु —**

सैनिकः चषकः गायिका महिषी जलम् कुक्कुरः द्वारम्
फलम् वृद्धा वृक्षः अजा वातायनम् अङ्कनी पुस्तकम् शुकः




६. **उदाहरणानुसारं पट्टिकातः उपयुक्तपदं चित्वा रिक्तस्थानानि पूरयन्तु —**

माला युवकौ पाठशाला मुखम् कमले
भवनानि बिडालः छात्राः लेखन्यौ मालाः

यथा – सा का ? सा पाठशाला ।

| | | |
|---|---|---|
| सः कः ? | तौ कौ ? | ते के ? |
| .................. | .................. | .................. |
| सा का ? | ते के ? | ताः काः ? |
| .................. | .................. | .................. |
| तत् किम् ? | ते के ? | तानि कानि ? |
| .................. | .................. | .................. |




७. **निम्नलिखितानि वाक्यानि अधिकृत्य उदाहरणानुसारं प्रश्ननिर्माणं कुर्वन्तु —**

यथा – सः गजः । – सः कः ?

(क) सः बालकः । – ..................  (ख) सा लता । – ..................

(ग) सा नदी । – ..................  (घ) तत् फलम् । – ..................

(ङ) सः वृक्षः । – ..................

३. एषः कः ? एषा का ? एतत् किम् ?



Reprint 2025-26
© NCERT not to be republished

८. **परस्परं सम्बद्धानि पदानि संयोजयन्तु, रिक्तस्थानेषु पूरयन्तु च —**

| | | | |
|---|---|---|---|
| (क) | नर्तकी | गायति | नर्तकी नृत्यति। |
| (ख) | लेखकः | चालयति | ........................ |
| (ग) | फलम् | नृत्यति | ........................ |
| (घ) | कमलम् | लिखति | ........................ |
| (ङ) | चालकः | पतति | ........................ |
| (च) | गायिका | विकसति | ........................ |



९. **उदाहरणानुसारं कोष्ठकेभ्यः उचितानि पदानि चित्वा वाक्यानि रचयन्तु —**

**यथा** – कः / का लिखति ? (लेखकः, छात्रः, सा)

लेखकः लिखति। छात्रः लिखति। सा लिखति।

(क) कः / का धावति ? (बालकः, बालिका, शुनकः)

........................ ........................ ........................

(ख) कः / का पठति ? (सुरेशः, जानकी, नलिनी)

........................ ........................ ........................

(ग) किं पतति ? (फलम्, जलम्, कुसुमम्)

........................ ........................ ........................

(घ) का / कः गच्छति ? (शिक्षिका, बालिका, तन्त्रज्ञः)

........................ ........................ ........................

(ङ) का / कः / किम् अस्ति ? (माता, पिता, वाहनम् )

........................ ........................ ........................

© NCERT not to be republished



Reprint 2025-26

## योग्यताविस्तरः

### अकारान्तः शब्दः



यस्य शब्दस्य अन्ते 'अ'वर्णः अस्ति सः अकारान्तः शब्दः भवति।

(एतादृशः शब्दः पुंलिङ्गे अथवा नपुंसकलिङ्गे भवति।)

**यथा** – बालक्+अ    हस्त् + अ    अज् + अ

फल् + अ    ज्ञान् + अ    गृह् + अ

### आकारान्तः शब्दः



यस्य शब्दस्य अन्ते 'आ'वर्णः अस्ति सः आकारान्तः शब्दः भवति।

(एतादृशः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

**यथा** - बालिक् + आ    रम् + आ    लत् + आ

### ईकारान्तः शब्दः

यस्य शब्दस्य अन्ते 'ई'वर्णः अस्ति सः ईकारान्तः शब्दः भवति।

(ईकारान्तः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

**यथा** – नद् + ई    लेखन् + ई    घट् + ई

© NCERT not to be republished

### तत् एतत् किम्

| | | | |
|---|---|---|---|
| ✻ द्कारान्त-पुंलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'सः' | इति। |
| ✻ द्कारान्त-पुंलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एषः' | इति। |
| ✻ द्कारान्त-स्त्रीलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'सा' | इति। |
| ✻ द्कारान्त-स्त्रीलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एषा' | इति। |
| ✻ द्कारान्त-नपुंसकलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'तत्' | इति। |
| ✻ द्कारान्त-नपुंसकलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एतत्' | इति। |
| ✻ म्कारान्त-पुंलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'कः' | इति। |
| ✻ म्कारान्त-स्त्रीलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'का' | इति। |
| ✻ म्कारान्त-नपुंसकलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'किम्' | इति। |



Reprint 2025-26



## परियोजनाकार्यम्

१. गृहजनानां मित्राणां वा साहाय्येन पञ्चदश (१५) गृहवस्तूनामानि लिङ्गविभागेन लिखन्तु।

२. अधः केचन व्यावहारिकाः शब्दाः सन्ति। तेषाम् अर्थं शिक्षकस्य साहाय्येन अन्विष्य लिखन्तु।

| अकारान्त-पुंलिङ्गम् | अकारान्त-नपुंसकलिङ्गम् | आकारान्त-स्त्रीलिङ्गम् | ईकारान्त-स्त्रीलिङ्गम् |
|---|---|---|---|
| आसन्दः | फलम् | बालिका | लेखनी |
| सुधाखण्डः | उपनेत्रम् | महिला | अङ्कनी |
| स्यूतः | युतकम् | शाटिका | दूरवाणी |
| विद्यालयः | मन्दिरम् | पेटिका | कूपी |
| वृक्षः | भवनम् | पादुका | द्रोणी |
| कटः | वातायनम् | उत्पीठिका | नदी |
| तालः | व्यजनम् | रोटिका | घटी |
| दर्पणः | भोजनम् | स्थालिका | नर्तकी |
| दीपः | कदलीफलम् | कुञ्चिका | वेणी |
| घटः | पाथेयपात्रम् | सूचिका | कर्तरी |
| दण्डदीपः | द्वारम् | तूलिका | गृहिणी |
| गजः | वलयम् | मञ्जूषा | मार्जनी |
| नागदन्तः | उद्यानम् | छुरिका | सम्मार्जनी |
| रजकः | सूच्यौषधम् | गृहगोधिका | सखी |
| धीवरः | उपांशुकम् | धूमनलिका | आकाशवाणी |
| युवकः | पादांशुकम् | दिनदर्शिका | वर्णलेखनी |
| प्रश्नः | दिनम् | खट्वा | जननी |
| शुनकः | उत्तरम् | शाखा | नारी |
| आचार्यः | उष्णीषम् | शिक्षिका | नगरी |
| खगः | वस्त्रम् | गुलिका | पुनःपूरणी |
| सागरः | नगरम् | पिपीलिका | कुमारी |

© NCERT not to be republished



Reprint 2025-26